**TERM-1 EXAMINATION (2026-27)**

**SANSKRIT (119) SET - 1**

Class : IX | Duration : 3 Hrs
Date :04.09.2026 | Max. Marks : **80**
Admission No: | Roll No:

---

सामान्यनिर्देशाः

1. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 10 पृष्ठानि मुद्रितानि सन्ति ।
2. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 18 प्रश्नाः सन्ति ।
3. अस्मिन् प्रश्नपत्रे चत्वारः भागाः सन्ति ।
4. प्रत्येकं भागम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि ।
5. उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमाङ्कः अवश्यं लेखनीयः ।
6. प्रश्नस्य क्रमाङ्कः प्रश्नपत्रानुसारम् एव लेखनीयः ।
7. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि ।
8. प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः ।

---

प्रश्नपत्रस्वरूपम् -

| | |
|---|---|
| 'क' भागः अपठितावबोधनम् | 10 अङ्काः |
| 'ख' भागः : रचनात्मककार्यम् | 15 अङ्काः |
| 'ग' भागः : अनुप्रयुक्तव्याकरणम् | 28 अङ्काः |
| 'घ' भागः : पठितावबोधनम् | 27 अङ्काः |

---

## खण्ड–क : अपठितावबोधनम् (10 अंकाः)

प्रश्न 1. अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत -

एकदा एकः कृषकः ग्रामे निवसति स्म। सः परिश्रमी तथा ईमानदारः आसीत्। प्रतिदिनं प्रातःकाले उत्थाय सः स्वक्षेत्रं गच्छति स्म। सः भूमिं कर्षति, बीजानि वपति, समये जलं च सिञ्चति स्म। तस्य परिश्रमेण क्षेत्रे उत्तमं धान्यं भवति स्म। कृषकः स्वकार्ये सदा विश्वासं करोति स्म। सः कथयति स्म – "परिश्रमः एव सफलतायाः मूलम् अस्ति।" ग्रामस्य सर्वे जनाः तस्य प्रशंसां कुर्वन्ति स्म।

(अ) एकपदेन उत्तरत - (प्रश्नद्वयम्) (2×1=2)

(i) कृषकः कुत्र निवसति स्म?
(ii) कृषकः किम् वपति स्म?
(iii) सफलतायाः मूलं किम् अस्ति?

(आ) पूर्णवाक्येन उत्तरत - (प्रश्नद्वयम्) (2×2=4)

(i) कृषकः प्रतिदिनं किं करोति स्म?
(ii) कृषकस्य क्षेत्रे किं भवति स्म?
(iii) ग्रामस्य जनाः कृषकस्य किम् कुर्वन्ति स्म?

(इ) निर्देशानुसारम् उचितविकल्पं चिनुत- (प्रश्नत्रयम्) (3×1=3)

(i) 'अधमम्' इति पदस्य विलोमपदं किम् अस्ति?

(अ) श्रेष्ठम् (आ) उत्तमम्
(इ) सुन्दरम् (ई) मधुरम्

(ii) 'धरा' इति पदस्य पर्यायपदं किम् अस्ति?

(अ) भूमिः (आ) जलम्
(इ) गगनम् (ई) वनम्

(iii) 'कृषकः भूमिं कर्षति।' अस्मिन् वाक्ये क्रियापदं किम् अस्ति?

(अ) कृषकः (आ) भूमिम्
(इ) कर्षति (ई) वाक्यम्

(iv) 'सः स्वक्षेत्रं गच्छति स्म।' अस्मिन् वाक्ये कर्तृपदं किम् अस्ति?

(अ) स्वक्षेत्रम् (आ) गच्छति
(इ) सः (ई) स्म

(ई) अस्य गद्यांशस्य उचितं शीर्षकं लिखत - (1×1=1)

खण्ड–ख : रचनात्मककार्यं (15 अंकाः)

प्रश्न 2. अधोलिखितं पत्रं मञ्जूषायां दत्तैः पदैः सहायतया पूरयित्वा पुनः लिखत। (1/2×10=5)

सेवायाम्,
श्रीमान् (1) --------- महोदयः,
(2) --------- विद्यालयः।

विषयः – (3) --------- प्रार्थना पत्रम्।

महोदय!

सविनयं निवेदयामि यत् अहं भवतः (4) --------- पुस्तकालयाध्यक्षः अस्मि। अस्माकं विद्यालयस्य पुस्तकालये नूतनानां (5) --------- आवश्यकता अस्ति। संस्कृतस्य छात्राः (6) --------- पुस्तकानि इच्छन्ति अतः कृपया पुस्तकालयाय संस्कृतविषयकानि उपयोगीनि पुस्तकानि (7) --------- । भवतः कृपया अहं छात्राः च (8) --------- भविष्यामि।

धन्यवादः।

दिनाङ्कः – (9) ---------

भवदीयः,

(10) ---------

मञ्जूषा

(विद्यालयस्य, प्रधानाचार्यः, संस्कृत, पुस्तकानाम्, छात्रः, पुस्तकप्राप्त्यर्थम्, पुस्तकालयाध्यक्षः, सान्दीपिनी, प्रदास्यन्तु, कृतज्ञाः)

प्रश्न 3. अधोलिखितं चित्रं दृष्ट्वा संस्कृतेन पञ्च वाक्यानि लिखत- (1×5=5)



मञ्जूषा

(छात्राः, वृक्षारोपणम्, उद्यानम्, पर्यावरणम्, जलम्, शिक्षकः, मृत्तिकां, कुर्वन्ति, शिक्षयति)

अथवा

'क्रीडा-महत्त्वम्' इति विषये मञ्जूषाया: सहायतया संस्कृतेन पञ्च वाक्यै: अनुच्छेदं लिखत |

मञ्जूषा

महत्त्वपूर्णम्, सर्वेभ्यः, अनिवार्यम्, स्वास्थ्याय, जीवनम्, संयमः, स्थानम्, सफलाः जनाः, क्रीडा ।

प्रश्न 4. निम्नलिखितम् संवादं मञ्जूषाप्रदत्तपङ्क्तिसहायतया पूरयित्वा पुनः लिखत - (1×5=5)

छात्रयोः मध्ये परीक्षाविषये संवादः

रमेशः – मित्र! (1) ----------- समीपे एव आगता अस्ति।

सुरेशः – आम् मित्र! अहम् अपि परीक्षायाः (2) ----------- कुर्वन् अस्मि।

रमेशः – त्वं प्रतिदिनं कियत्कालं (3) ----------- करोषि?

सुरेशः – अहं प्रतिदिनं (4) ----------- पठामि।

रमेशः – परीक्षायां सफलतायै किं करणीयम् ?

सुरेशः – नियमितं स्वध्यायः तथा समयस्य (5) ----------- आवश्यकः।

मञ्जूषा

(परीक्षा, अभ्यासम्, सदुपयोगः, घण्टात्रयं, अध्ययनम्)

अथवा

अध: एका कथा लिखिता अस्ति। तस्यां कानिचित् पदानि रिक्तानि सन्ति। मञ्जूषायां दत्तानि पदानि सहायतायै । तानि पूरयित्वा कथां पुनः उत्तरपुस्तिकायां लिखत। (½X10 =5)

एकदा महात्मा गांधि पत्राणि (i) ----------- । सहसा मसीपात्रे (ii) ------------ समाप्ता। तत्रैव लेखनीं परित्यज्य सः कार्यवशात् बहिः (iii) ------------। पुनः यदा आगतः, तदा तत्र लेखनीं मसिपात्रं च न (iv) ------------। लेखनी कुत्रापि न आसीत्। सः कर्मचारिणं (v) ------- । कर्मचारी अवदत्-'सा तु मया बहिः (vi) ---------। नूतनां लेखनीं स्वीकरोतु इति। महात्मा गांधिः प्रत्यवदत्- तस्याम् एव मसीं पातय। देशस्य धनम् अमूल्यम् (vii) ----------, क्षुद्रातिक्षुद्रम् अपि वस्तु न क्षेपणीयम्। एवम् उक्त्वा सः स्वयं (viii) -------- गत्वा लेखनीम् अन्विष्य (ix) ------------ तस्यां मसीम् अपातयत्, तया एव (X) ------------ प्रारब्धवान् ।

मञ्जूषा

आनीतवान्, लिखति स्म, अस्ति, क्षिप्ता, पृष्टवान्, दृष्टवान्, गतवान्, मसी, लेखनकार्यं, बहिः

## खण्ड–ग : अनुप्रयुक्तव्याकरणम् (28 अंकाः)

प्रश्न 5. अधोलिखितवाक्येषु रेखाङ्कितपदानां सन्धि विच्छेदं वा कृत्वा रिक्तस्थानानि पूरयत -(1×3=3)

(i) (विद्या + आलयः)___________ मम विद्यालयस्य नाम अस्ति।
(ii) ग्रामे (महा + उत्सवः)___________ आयोजितः अस्ति।
(iii) (सत् + जनः)___________ सर्वदा पूजनीयाः भवन्ति।

अथवा

(i) अहं प्रतिदिनं (देवालयम्)___________ गच्छामि।
(ii) (नरेन्द्रः)___________ महान् राजा आसीत्।
(iii) (जगदीशः)___________ सर्वैः पूज्यते।

प्रश्न 6. रेखाङ्कितपदानां समासाय विग्रहाय वा उचितविकल्पं चिनुत - (प्रश्नत्रयम्) (3×1=3)

(i) मित्र! पश्य <u>राजपुत्रः</u> आगच्छति।

(अ) राजा च पुत्रः च | (आ) राज्ञः पुत्रः
(इ) राज्ञा पुत्रः | (ई) राजे पुत्रः

(ii) उद्याने <u>नीलकमलम्</u> सुन्दरं दृश्यते।

(अ) नीलं च कमलं च | (आ) नीलस्य कमलम्
(इ) नीलं कमलम् | (ई) नीलात् कमलम्

(iii) अस्मिन् ग्रामे <u>ग्राममार्गः</u> अस्ति।

(अ) ग्रामस्य मार्गः | (आ) ग्रामः च मार्गः च
(इ) ग्रामे मार्गः | (ई) ग्रामात् मार्गः

(iv) श्रीरामः <u>दशरथस्य पुत्रः</u> आसीत्।

(अ) दशरथ: पुत्रः | (आ) दशरथपुत्र:
(इ) दाशरथी | (ई) दशरथसुतः

प्रश्न 7. अधोलिखितसमयान् संस्कृतेन लिखत - (प्रश्नत्रयम्) (3×1=3)

(i) अहं प्रातः (5:00) ---------- वादने उत्थाय व्यायामं करोमि।
(ii) छात्राः (7:30) ---------- वादने विद्यालयं गच्छन्ति।
(iii) अहं (10:15) ------------ भोजनं करोमि।
(iv) सः (11:45) ----------- विद्यालयात् गृहं आगच्छति।

प्रश्न 8. उचितैः अव्ययपदैः रिक्तस्थानानि पूरयत - (4×1=4)

(अद्य, शनैः, यदा, तदा)

(i) ------- अहं विद्यालयं गमिष्यामि।
(ii) ------- परिश्रमं करोति ------- सफलः भवति।
(iii) वृद्धः पुरुषः ------- चलति।

प्रश्न 9. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृतिसंयोज प्रत्यययोः–नाय समुचितंविकल्पं चित्वा लिखत - (प्रश्नचतुष्टयम्) (4×1=4)

(i) रामः भोजनं (पठ् + क्त्वा) ----------- विद्यालयं गच्छति।

| | |
|---|---|
| (अ) पठित्वा | (आ) पठितुम् |
| (इ) पठन् | (ई) पठनीयम् |

(ii) सः ग्रामं (गम् + तुमुन्) ----------- सिद्धः अस्ति।

| | |
|---|---|
| (अ) गत्वा | (आ) गन्तुम् |
| (इ) गच्छन् | (ई) गतः |

(iii) बालकः ईश्वरं (सम् + पूज् + ल्यप्) ---------- पूर्णं करोति।

| | |
|---|---|
| (अ) सम्पूज्यित्वा | (आ) संपूज्य |
| (इ) संपूज्यन् | (ई) सम्पूजितवान् |

(iv) छात्रः (चिन्त् + शतृ) --------- सर्वदा प्रश्नान् पृच्छति।

| | |
|---|---|
| (अ) चिन्तयित्वा | (आ) चिन्तयितुम् |
| (इ) चिन्तयन् | (ई) चिन्तयितः |

(v) छात्रः (गम्+ शानच्) --------- वार्तालापं करोति।

| | |
|---|---|
| (अ) गम्यमाना | (आ) गम्यमानम् |
| (इ) गम्यमानान् | (ई) गम्यमानः |

प्रश्न 10. अधोलिखितवाक्येषु उपपदविभक्त्यै उचितं विभक्तिरूपं चिनुत - (प्रश्नचतुष्टयम्) (4×1=4)

(i) ______ *परितः* वृक्षाः सन्ति।

| | |
|---|---|
| (अ) विद्यालयम् | (आ) विद्यालयात् |
| (इ) विद्यालयस्य | (ई) विद्यालये |

(ii) ______ *विना* जीवनं न शोभते।

| | |
|---|---|
| (अ) विद्यया | (आ) विद्यायाः |
| (इ) विद्याम् | (ई) विद्या |

(iii) रामः ______ सह विद्यालयं गच्छति।

| | |
|---|---|
| (अ) मित्रम् | (आ) मित्रेण |
| (इ) मित्रस्य | (ई) मित्राय |

(iv) ______ नमः कुर्मः।

| | |
|---|---|
| (अ) गुरुम् | (आ) गुरवे |
| (इ) गुरुणा | (ई) गुरोः |

(v) सः ______ *निपुणः* अस्ति।

| | |
|---|---|
| (अ) संस्कृतभाषाम् | (आ) संस्कृतभाषया |
| (इ) संस्कृतभाषायाम् | (ई) संस्कृतभाषायाः |

प्रश्न 11. अधोलिखितवाक्येषु कोष्ठकस्थशब्दस्य निर्दिष्टविभक्तेः उचितरूपं चिनुत तथा रिक्तस्थानानि पूरयत - (प्रश्नचतुष्टयम्) (4×1=4)

(i) ______ विद्यालयं गच्छन्ति। *(बालक – प्रथमा विभक्तिः, बहुवचनम्)*

(अ) बालकाः (आ) बालकान्
(इ) बालकैः (ई) बालकस्य

(ii) चित्रकारः ______ चित्रं निर्माति। *(नदी – द्वितीया विभक्तिः, एकवचनम्)*

(अ) नदी (आ) नद्याः
(इ) नदीम् (ई) नद्याम्

(iii) ______ शिक्षकाय आदरं दीयते। *(युष्मद् – तृतीया विभक्तिः, बहुवचनम्)*

(अ) त्वया (आ) युवाभ्याम्
(इ) युवयोः (ई) युष्माभिः

(iv) गुरुः ______ गृहकार्यं ददाति। *(अस्मद् – चतुर्थी विभक्तिः, बहुवचनम्)*

(अ) अस्मान् (आ) अस्मभ्यम्
(इ) अस्माभिः (ई) अस्माकम्

(v) एषः ______ गृहम् अस्ति। *(बालक – षष्ठी विभक्तिः, एकवचनम्)*

(अ) बालकस्य (आ) बालकाय
(इ) बालकम् (ई) बालके

प्रश्न 12. अधोलिखितवाक्येषु कोष्ठकस्थधातोः निर्दिष्टलकारस्य उचितरूपं चिनुत - (3×1=3)

(i) छात्राः प्रतिदिनं संस्कृतपाठं ______। *(पठ् – लट् लकारः, प्रथमपुरुषः, बहुवचनम्)*

(अ) पठति (आ) पठन्ति
(इ) पठसि (ई) पठामि

(ii) रामः गतदिने विद्यालयं ______। *(गम् – लङ् लकारः, प्रथमपुरुषः, एकवचनम्)*

(अ) गच्छति (आ) अगच्छत्
(इ) गमिष्यति (ई) गच्छतु

(iii) यूयं श्वः विद्यालये उपस्थितः ______। *(भू – लृट् लकारः, मध्यमपुरुषः, बहुवचनम्)*

(अ) भविष्यथ (आ) भविष्यथ
(इ) भविष्यन्ति (ई) भविष्यामः

(iv) हे छात्राः! यूयं सर्वे गृहकार्यं ______। *(कृ – लोट् लकारः, मध्यमपुरुषः, बहुवचनम्)*

(अ) कुरुत (आ) कुर्वन्तु
(इ) कुर्वन्ति (ई) करिष्यन्ति

(खण्ड घ : पठितावबोधनम् ((27 अंकाः)

प्रश्न 13. अधोलिखितं गद्यांशं पठित्वा यथानिर्देशम् प्रश्नानाम् उत्तराणि लिखत -

अन्येद्युः सः मुनिः समन्विष्य तं धर्मव्याधं विपणिस्थं मांसानि विक्रीणन्तम् उपागच्छत्। धर्मव्याधश्च दृष्ट्वा एव तं मुनिम् अभाषत - "ब्रह्मन् ! किं पतिव्रतया तया इह त्वं प्रेषितः?" तत् आकर्ण्य सः मुनिर्विस्मितः तं धर्मव्याधम् अवदत् -"भद्र मांसविक्रयिणः ते कथम् ईदृशं विज्ञानम्" ? धर्मव्याधः अवदत् - "ब्रह्मन् ! अहं मातापित्रोर्भक्तः । तौ हि मम परायणम्। अहं तौ स्नापयित्वा स्नामि, भोजयित्वा भोजनं स्वीकरोमि शाययित्वा च स्वपिमि। तेन मे एतादृशं विज्ञानम्। अन्यहतानां च मृगादीनां मांसानि स्वधर्म इति मत्वा वृत्त्यर्थं विक्रीणे, न तु धनलिप्सया। हे मुने। ज्ञानविघ्नोऽहङ्कारः । अतः स्वधर्मं चर, येन आशु परं श्रेयः अवाप्स्यसि ।"

ततश्च धर्मव्याधेन एवम् अनुशिष्टः स मुनिः तद्गृहं गत्वा धर्मव्याधस्य च सर्वं क्रियाविधिम् अवलोक्य परितुष्टः वनं गतवान् अवाप्तवान् च तदुपदेशात् सिद्धिम् ।

उक्तञ्च - कर्मणैव हि संसिद्धिम् आस्थिता जनकादयः ।

I. एकपदेन उत्तरत- (प्रश्नद्वयम्) (1/2×2=1)

(i) धर्मव्याधः किम् विक्रीणन् आसीत् ?

(ii) कः मातापित्रोः भक्तः आसीत् ?

(iii) कर्मणैव हि संसिद्धिम् का जनकादयः ?

II. पूर्णवाक्येन उत्तरत- (प्रश्नद्वयम्) (1×2=2)

(i) धर्मव्याधः मुनिं दृष्ट्वा किम् अभाषत ?

(ii) मुनिः किम् अवलोक्य परितुष्टः वनं गतवान्?

(iii) केषां मांसानि स्वधर्म इति मत्वा वृत्त्यर्थं विक्रीणे ?

III. भाषिककार्यम्- (1×2=2)

(i) 'सफलताम्' इत्यस्य पदस्य अर्थे अनुच्छेदे किं पदम् आगतम् ?

(क) क्रियाविधिम् (ख) संसिद्धिम्

(ग) विज्ञानम् (घ) स्वधर्मम्

(ii) 'उपागच्छत्' क्रियापदस्य कर्तृपदं किम् ?

(क) मुनिः (ख) धर्मव्याधः

(ग) सः (घ) सः मुनिः

अथवा

(i) अनुच्छेदे 'लोभेन' इत्यस्य पदस्य कः पर्यायः आगतः?

(क) येन (ख) मे

(ग) तेन (घ) लिप्सया

(ii) तेन ------- मे विज्ञानम् । उचितपदेन रिक्तस्थानं पूरयत-

(क) ईदृशम् (ग) ज्ञानम्

(ख) एतादृश (घ) तस्य

प्रश्न 14. अधोलिखितं नाट्यांशं पठित्वा यथानिर्देशम् प्रश्नानाम् उत्तराणि लिखत -

प्रतापः- धिङ् माम् अधन्यम् योऽहं मातृभूमिं रक्षितुम् असमर्थः। अलं मम एतेन जीवितेन। (दीर्घं निःश्वसिति)
(यावत् सहचराः तस्य आकृतिं दृष्ट्वा व्याकुलाः भवन्ति, तावदेव सहसा प्रविशति कश्चिद् मेवाडराजपुत्रः)

राजपुत्रः - (राजोचितं प्रणम्य) विजयतां महाराजः, विजयताम् ।

प्रतापः - (समाश्वस्य) अयि भ्रातः ! कथं जयघोषं कृत्वा मां लज्जयसे ?

राजपुत्रः - देव ! कथं भवान् वदति एवम् ? किं न खलु कृतं भवता राज्यत्राणाय? स्वदेशं स्वाधीनं कर्तुं भवता किं न सोढम् ? विजेष्यते ननु भवान् !

प्रतापः - कुतस्तावद् विजयः ! स्वदेशमेव त्यक्तुं तत्परोऽहम् ।

भटः - (अञ्जलिं बद्ध्वा) महाराज! नैवं तावत् । स्वामिभाग्यानाम् अनुगन्तारः वयम्। वयं सर्वे त्वाम् अनुगमिष्यामः ।

प्रतापः - एवं न वक्तव्यम् । कृतज्ञोऽस्मि भवताम् अहम् । वीरैः धीरैः बहु उपकृतं देशस्य। स्वदेशे एव तिष्ठद्भिः भवद्भिः देशस्य स्वतन्त्रतायै प्रयत्नः समाधेयः ।

सर्वे भटाः - देशरक्षायै बद्धपरिकरा वयं तु भवन्तमेव अनुसरिष्यामः ।

प्रतापः - यथा रोचते भवद्भ्यः। प्रदेशोऽयम् अस्माभिः त्याज्यः एव ।

I. एकपदेन उत्तरत- (प्रश्नद्वयम्) (1/2×2=1)

(i) प्रतापः काम् रक्षितुम् असमर्थः ?

(ii) राजपुत्रः कस्य विजयम् इच्छति?

(ii) भटाः केषाम् अनुगन्तारः सन्ति ?

II. पूर्णवाक्येन उत्तरत- (प्रश्नद्वयम्) (1×2=2)

(i) सहसा कः प्रविशति ?

(ii) प्रतापेन किमर्थं दुःखं सोढम् ?

(iii) कैः देशस्य बहु उपकृतम् ?

III. भाषिककार्यम्- (1×2=2)

(i) 'उपकृतम्' इत्यस्याः क्रियायाः कर्तृपदं किम् ?

(अ) वीरैः (आ) धीरैः

(इ) वीरैः धीरैः (ई) बहु

(ii) नाट्यांशे 'अलम्' पदस्य योगे का विभक्तिः प्रयुक्ता?

(अ) प्रथमा (आ) द्वितीया

(इ) तृतीया (ई) चतुर्थी

अथवा

(i) संवादे 'वदति' इति क्रियापदस्य कर्तृपदं किम् ?

(अ) कथम् (आ) एवम्

(इ) भवान् (ई) किमपि न

(ii) 'पराधीनम्' इत्यस्य पदस्य कः विपर्ययः संवादे प्रयुक्तः ?

(अ) आधीनम् (आ) स्वाधीनम्

(इ) विजयताम् (ई) असमर्थः

प्रश्न 15. अधोलिखितं पद्यांशं पठित्वा यथानिर्देशम् प्रश्नानाम् उत्तराणि लिखत -

माता शत्रुः पिता वैरी येन बालो न पाठितः ।
न शोभते सभामध्ये हंसमध्ये बको यथा ॥
सद्भिस्तु लीलया प्रोक्तं शिलालिखितमक्षरम् ।
असद्भिःशपथेनापि जले लिखितमक्षरम् ॥

I. एकपदेन उत्तरत- (प्रश्नद्वयम्) (1/2×2=1)

(i) हंसमध्ये को न शोभते ?
(ii) अपठितस्य बालस्य शत्रुः को भवति ?
(iii) कैः तु लीलया प्रोक्तं अपि शिलालिखितमक्षरम् भवति ?

II. पूर्णवाक्येन उत्तरत- (प्रश्नद्वयम्) (1×2=2)

(i) अपठितः बालः कुत्र न शोभते ?
(ii) हंसानां मध्ये कः न शोभते ?
(iii) असद्भिःकथनं कथं भवति ?

III. भाषिककार्यम्- (1×2=2)

(i) श्लोके 'पाठितः' इत्यस्याः क्रियायाः कर्तृपदं किम्?

(क) बालः (ख) येन
(ग) वैरी (घ) पिता

(ii) 'माता' इत्यस्य पदस्य कः विपर्ययः श्लोके प्रयुक्तः?

(क) पिता (ख) शत्रुः
(ग) वैरी (घ) बालः

अथवा

(i) 'येन' इति कर्तृपदस्य क्रियापदं श्लोके किम् ?

(क) शोभते (ख) पाठितः
(ग) बालो (घ) हंसमध्ये

(ii) अत्र 'पिता' इति विशेष्यपदस्य विशेषणपदं किं लिखितम् ?

(क) शत्रुः (ग) वैरी
(ख) पाठितः (घ) शोभते

प्रश्न 16. अधोलिखितवाक्येषु रेखांकितान् शब्दान् आधृत्य प्रश्ननिर्माणं कुरुत - (1×5=5)

(i) माधवः <u>उज्जयिन्याम्</u> अवसत्।
(ii) मूढैः <u>पाषाणखण्डेषु</u> रत्नसंज्ञा विधीयते।
(iii) विचारमग्नः महाराणाप्रतापः <u>शिलायाम्</u> उपविष्टः आसीत्।
(iv) <u>विद्याहीनाः</u> न शोभन्ते।
(v) <u>वृक्षस्य</u> उपरी बलाका अस्ति।
(vi) <u>विद्यया</u> बालकस्य पुनर्जन्म भवति।

प्रश्न 17. अधोलिखितस्य श्लोकस्य अन्वयं लिखत। (1/2×4=2)

अनेकसंशयोच्छेदि परोक्षार्थस्य दर्शकम् ।
सर्वस्य लोचनं शास्त्रं यस्य नास्त्यन्ध एव सः ॥

अन्वयः - अनेकसंशयोच्छेदि (i) ------- दर्शकम् (ii) ------ सर्वस्य लोचनं (अस्ति), (तत्) यस्य (iii) --------- सः (iv) --------- एव ।

मञ्जूषा

शास्त्रम्, परोक्षार्थस्य, अन्धः, नास्ति

अथवा

गच्छन् पिलीलको याति योजनानां शतान्यपि ।
अगच्छन् वैनतेयोऽपि पदमेकं न गच्छति ॥

अन्वयः - गच्छन् (i) ---------- योजनानां (ii) ---------- अपि याति । (अस्य विपरीतम्) अगच्छन् (iii) --------- अपि एकं (iv) ----------- न गच्छति ।

मञ्जूषा

पदम्, पिपीलकः, वैनतेयः, शतानि

प्रश्न 18. अधोलिखितां कथां मञ्जूषायाः पदसहायतया कथापूर्तिं कृत्वा पुनः लिखत - (1/2×10=5)

उज्जयिनी नगरे एकः (i) --------- नामकः ब्राह्मणः अवसत् । सः एकं नकुलम् पुत्रम् इव अपालयत्। तस्य एकः बालः (ii) ------------ आसीत्। एकदा तस्य पत्नी अपत्यस्य (iii) -------- ब्राह्मणं नियोज्य स्नानं कर्तुं गता। अत्रान्तरे माधवः (iv) ----------- श्राद्धं कारयितुं नृपेण आमन्त्रितः। दरिद्रतायाः कारणेन (v) ---------- अचिन्तयत् यत् यदि अहं राजप्रसादं शीघ्रं न गच्छामि (vi) --------------- तत्र अन्यः कश्चिद् ब्राह्मणः आगत्य श्राद्धं (vii) -------- तदा तु मम हानिः भविष्यति। काचिद् वार्ता नास्ति । इमं पुत्रवत् चिरेण पालितं (viii) -------- बालकस्य रक्षायां व्यवस्थाप्य गच्छामि। अयमेव बालकस्य (ix) ---------- भ्रातृवत् करिष्यति । इदं विचिन्त्य ब्राह्मणः बालरक्षायां विधाय राजप्रासादं (x) -------- ।

मञ्जूषा

तर्हि, नकुलं, ग्रहीष्यति, रक्षाम्, रक्षार्थम्, माधवः, ब्राह्मणः, गतः, पुत्रः, राजगृहे

======================== समाप्तम् ========================